# Shri Rama Ashtakam

# શ્રીરામાષ્ટકમ્

## Document Information

Text title : Rama Ashtakam 8

File name : rAmAShTakam8.itx

Category : raama, aShTaka

Location : doc_raama

Author : gAyatrisvarUpa brahmachari

Proofread by : Vani V

Description/comments : shrI bhagavat samarchA uttarArdhaH. Author/publisher comment mentions the cost of the book as bhagavadbhakti

Latest update : March 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# Shri Rama Ashtakam

## શ્રીરામાષ્ટકમ્

શ્રીગણેશાય નમઃ ।

રામં પ્રાતર્બ્રાહ્મમુહૂર્તે સ્મરણીયં
    રામં મધ્યે ક્ષણદાકાલે ભજનીયમ્ ।
રામં કાલાતીતમખણ્ડં નિજબોધં
    રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૧॥

રામં હ્યેકં પૂર્ણપ્રકાશં ઘનનીલં
    રામં સત્યં પદ્મસમાનં કમનીયમ્ ।
રામં ધ્યેયં જ્ઞેયમજસ્રાક્ષરરૂપં
    રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૨॥

રામં બ્રહ્માચ્યુતશિવવન્દ્યં જપનીયં
    રામં વેદત્રયભજનીયં સ્તવનીયમ્ ।
રામં નિત્યં ચિદ્ઘનરૂપં પ્રણવાખ્યં
    રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૩॥

રામં સીતાકાન્તસમાખ્યં સુખરૂપં
    રામં જ્યેષ્ઠં લક્ષ્મણપૂજ્યં રઘુનાથમ્ ।
રામં શત્રુઘ્નસ્ય સુપૂજ્યં ભરતસ્ય
    રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૪॥

રામં સર્વાન્તર્ગતરૂપં રમણઞ્ચ
    રામં નીલં પઙ્કજનેત્રં વદનઞ્ચ ।
રામં દિવ્યં નીલસરોજૈઃ સમરૂપં
    રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૫॥

રામં હસ્તે બાણધનુષ્કં રમણીયં
    રામં પીતામ્બરપરિધાનં સુખદં ચ ।
રામં ભક્તત્રાણપરં તં પરમેશં

રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૬॥

રામં જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિકભિન્નં
રામં કામક્રોધમદાદ્યૈ રહિતં ચ ।
રામં શુદ્ધં ચિદ્ઘનરૂપં શ્રુતિવેદ્યં
રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૭॥

રામં બુધ્યન્તર્ગતબિમ્બં બહુરૂપં
રામં સત્યજ્ઞાનમનન્તં વિમલઞ્ચ ।
રામં શુભ્રં તિમિરાતીતં સૂર્યસમં
રામં રમ્યં વ્યાપકરૂપં પ્રણતોઽસ્મિ ॥ ૮॥

રામનામામૃતં દિવ્યં પવિત્રં પુણ્યદાયકમ્ ।
અર્પયામ્યષ્ટકં રામં પ્રસન્નોભવ સર્વદા ॥ ૯॥

ઇતિ શ્રીગાયત્રીસ્વરૂપ બ્રહ્મચારીણા વિરચિતં શ્રીરામાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Vani V

*Shri Rama Ashtakam*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*